# ॥ वाल्मीकि रामायण॥

## ६ युद्धकाण्ड

### अध्याय २८

नरवानरराजौ तौ स च वायुसुतः कपिः ।
जाम्बवानृक्षराजश्च राक्षसश्च विभीषणः ॥ १॥

अङ्गदो वालिपुत्रश्च सौमित्रिः शरभः कपिः ।
सुषेणः सहदायादो मैन्दो द्विविद एव च ॥ २॥

गजो गवाक्षो कुमुदो नलोऽथ पनसस्तथा ।
अमित्रविषयं प्राप्ताः समवेताः समर्थयन् ॥ ३॥

इयं सा लक्ष्यते लङ्का पुरी रावणपालिता ।
सासुरोरगगन्धर्वैरमरैरपि दुर्जया ॥ ४॥

कार्यसिद्धिं पुरस्कृत्य मन्त्रयध्वं विनिर्णये ।
नित्यं संनिहितो ह्यत्र रावणो राक्षसाधिपः ॥ ५॥

तथा तेषु ब्रुवाणेषु रावणावरजोऽब्रवीत् ।
वाक्यमग्राम्यपदवत्पुष्कलार्थं विभीषणः ॥ ६॥

अनलः शरभश्चैव सम्पातिः प्रघसस्तथा ।
गत्वा लङ्कां ममामात्याः पुरीं पुनरिहागताः ॥ ७॥

भूत्वा शकुनयः सर्वे प्रविष्टाश् च रिपोर्बलम् ।
विधानं विहितं यच्च तद्दृष्ट्वा समुपस्थिताः ॥ ८॥

संविधानं यथाहुस्ते रावणस्य दुरात्मनः ।
राम तद्ब्रुवतः सर्वं यथातथ्येन मे शृणु ॥ ९॥

पूर्वं प्रहस्तः सबलो द्वारमासाद्य तिष्ठति ।
दक्षिणं च महावीर्यौ महापार्श्वमहोदरौ ॥ १०॥

इन्द्रजित्पश्चिमद्वारं राक्षसैर्बहुभिर्वृतः ।
पट्टसासिधनुष्मद्भिः शूलमुद्गरपाणिभिः ॥ ११॥

नानाप्रहरणैः शूरैरावृतो रावणात्मजः ।
राक्षसानां सहस्रैस्तु बहुभिः शस्त्रपाणिभिः ॥ १२॥

युक्तः परमसंविग्नो राक्षसैर्बहुभिर्वृतः ।
उत्तरं नगरद्वारं रावणः स्वयमास्थितः ॥ १३॥

विरूपाक्षस्तु महता शूलखड्गधनुष्मता ।
बलेन राक्षसैः सार्धं मध्यमं गुल्ममास्थितः ॥ १४॥

एतानेवंविधान्गुल्माँल्लङ्कायां समुदीक्ष्य ते ।
मामकाः सचिवाः सर्वे शीघ्रं पुनरिहागताः ॥ १५॥

गजानां च सहस्रं च रथानामयुतं पुरे ।
हयानामयुते द्वे च साग्रकोटी च रक्षसाम् ॥ १६॥

विक्रान्ता बलवन्तश्च संयुगेष्वाततायिनः ।
इष्टा राक्षसराजस्य नित्यमेते निशाचराः ॥ १७॥

एकैकस्यात्र युद्धार्थे राक्षसस्य विशां पते ।
परिवारः सहस्राणां सहस्रमुपतिष्ठते ॥ १८॥

एतां प्रवृत्तिं लङ्कायां मन्त्रिप्रोक्तं विभीषणः ।
रामं कमलपत्राक्षमिदमुत्तरमब्रवीत् ॥ १९॥

कुबेरं तु यदा राम रावणः प्रत्ययुध्यत ।
षष्टिः शतसहस्राणि तदा निर्यान्ति राक्षसाः ॥ २०॥

पराक्रमेण वीर्येण तेजसा सत्त्वगौरवात् ।
सदृशा योऽत्र दर्पेण रावणस्य दुरात्मनः ॥ २१॥

अत्र मन्युर्न कर्तव्यो रोषये त्वां न भीषये ।
समर्थो ह्यसि वीर्येण सुराणाम् अपि निग्रहे ॥ २२॥

तद्भवांश्चतुरङ्गेण बलेन महता वृतः ।
व्यूह्येदं वानरानीकं निर्मथिष्यसि रावणम् ॥ २३॥

रावणावरजे वाक्यमेवं ब्रुवति राघवः ।
शत्रूणां प्रतिघातार्थमिदं वचनमब्रवीत् ॥ २४॥

पूर्वद्वारे तु लङ्काया नीलो वानरपुङ्गवः ।
प्रहस्तं प्रतियोद्धा स्याद्वानरैर्बहुभिर्वृतः ॥ २५॥

अङ्गदो वालिपुत्रस्तु बलेन महता वृतः ।

दक्षिणे बाधतां द्वारे महापार्श्वमहोदरौ ॥ २६॥

हनूमान्पश्चिमद्वारं निपीड्य पवनात्मजः ।
प्रविशत्वप्रमेयात्मा बहुभिः कपिभिर्वृतः ॥ २७॥

दैत्यदानवसङ्घानामृषीणां च महात्मनाम् ।
विप्रकारप्रियः क्षुद्रो वरदानबलान्वितः ॥ २८॥

परिक्रामति यः सर्वाँल्लोकान्सन्तापयन्प्रजाः ।
तस्याहं राक्षसेन्द्रस्य स्वयमेव वधे धृतः ॥ २९॥

उत्तरं नगरद्वारमहं सौमित्रिणा सह ।
निपीड्याभिप्रवेक्ष्यामि सबलो यत्र रावणः ॥ ३०॥

वानरेन्द्रश्च बलवानृक्षराजश्च जाम्बवान् ।
राक्षसेन्द्रानुजश् चैव गुल्मे भवतु मध्यमे ॥ ३१॥

न चैव मानुषं रूपं कार्यं हरिभिराहवे ।
एषा भवतु नः संज्ञा युद्धेऽस्मिन्वानरे बले ॥ ३२॥

वानरा एव निश्चिह्नं स्वजनेऽस्मिन्भविष्यति ।
वयं तु मानुषेणैव सप्त योत्स्यामहे परान् ॥ ३३॥

अहमेव सह भ्रात्रा लक्ष्मणेन महौजसा ।
आत्मना पञ्चमश्चायं सखा मम विभीषणः ॥ ३४॥

स रामः कार्यसिद्ध्यर्थमेवमुक्त्वा विभीषणम् ।
सुवेलारोहणे बुद्धिं चकार मतिमान्मतिम् ॥ ३५॥

ततस्तु रामो महता बलेन
प्रच्छाद्य सर्वां पृथिवीं महात्मा ।
प्रहृष्टरूपोऽभिजगाम लङ्कां
कृत्वा मतिं सोऽरिवधे महात्मा ॥ ३६॥

---

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

---

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

---

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com